VERSE SET TEXT

# The Bhagavad Gītā

The Bhagavad Gītā, which forms part of the great epic, the *Mahābhārata,* is one of the most famous and best-loved Sanskrit texts. Two armies, those of the Pāṇḍavas and the Kauravas, are on the battlefield preparing to fight. Arjuna, the champion of the Pāṇḍavas, is struck down with despair when he sees so many of his relatives and respected friends in the opposing army. He turns to his cousin and chariot driver, Kṛṣṇa, for advice. The Bhagavad Gītā is the conversation that then follows between Arjuna and Kṛṣṇa.

*[Note to teacher: This passage, and the other set texts in this series of books, needs to be thoroughly prepared by the students with your help.]*

PRESENTATION:

- The verse is given first in *sandhi* in the original form, followed by each word out of *sandhi* then an English translation
- There are many possible English translations – those appearing here are one version only
- There are also several published translations which give help with the detailed grammar
- Each verse is followed by a gloss of the more difficult words
- Compound words: TP = *tatpuruṣa* BV = *bahuvrīhi* DV = *dvandva* AV = *avyayībhāva*

# अर्जुन उवाच

## निहत्य धार्तराष्ट्रान् नः का प्रीतिः स्याज्जनार्दन।
## पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः ॥१॥३६॥

## निहत्य । धार्तराष्ट्रान् । नः । का । प्रीतिः । स्यात् । जनार्दन ।
## पापम् । एव । आश्रयेत् । अस्मान् । हत्वा । एतान् ।आततायिनः॥

*arjuna uvāca:*
nihatya dhārtarāṣṭrān naḥ kā prītiḥ syājjanārdana
pāpam evāśrayed asmān hatvaitān ātatāyinaḥ

*(Arjuna said:)*
1.36. O Janārdana (Kṛṣṇa), what satisfaction would there be for us, in striking down the sons of Dhṛtarāṣṭra? Guilt, indeed, would trouble us after killing these aggressors.

| | |
|---|---|
| निहत्य | (gerund नि + √हन्) striking down, killing |
| धार्तराष्ट्रान् | (m. acc. pl.) the sons of धृतराष्ट्र |
| नः | (dat. or gen. pl.) to us |
| प्रीतिः | (f. nom. sg.) joy, pleasure |
| स्यात् | (3rd sg. optative act. √अस्) it should be, let it be |
| जनार्दन | (m. voc. sg.) Agitator of men (Kṛṣṇa) (from जन (man) + √अर्द् agitate, torment, move) |
| पापम् | (m. nom. sg.) evil, harm, trouble |
| आश्रयेत् | (3rd sg. optative act. आ + √श्रि) it should cling to, it should lean on, take hold of |
| हत्वा | (gerund √हन्) killing, having killed |
| एतान् | (m. acc. pl.) these |
| आततायिनः | (m. acc. pl.) having bows drawn (from आ + √तन्) |

## सञ्जय उवाच

## एवमुक्त्वाऽर्जुनः सङ्ख्ये रथोपस्थ उपाविशत् ।
## विसृज्य सशरं चापं शोकसंविग्नमानसः ॥१॥४७॥

sañjaya uvāca
evam uktvārjunaḥ saṅkhye rathopastha upāviśat
visṛjya saśaraṃ cāpaṃ śokasaṃvignamānasaḥ

## एवम् । उक्त्वा । अर्जुनः । सङ्ख्ये । रथ-उपस्थ । उपाविशत् ।
## विसृज्य । स-शरम् । चापम् । शोक-संविग्न-मानसः ॥

*Sañjaya said:*
1.47. Having spoken thus on the battlefield, Arjuna sat down on the seat of his chariot, casting aside his bow and arrows, his mind distracted by grief.

| | |
|---|---|
| उक्त्वा | (gerund √वच्) speaking, having spoken |
| सङ्ख्ये | (n. loc. sg.) in the battle, challenge, conflict |
| उपस्थः | (m.) seat, stool |
| रथ-उपस्थे | [by sandhi] (m. loc. sg. TP) on the seat of the chariot |
| उपाविशत् | (3rd sg. imperfect. act. उप + आ + √विश्) sat down, settled upon |
| विसृज्य | (gerund वि + √सृज्) throwing down, casting aside |
| सशरम् | (n. acc. sg.) arrow |
| चापम् | (m/n. acc. sg.) bow |
| संविग्न | (ppp. सम् + √विज्) starting back, recoiling, overcome |
| मानसः | (m. nom. sg.) mind, heart, spirit |
| शोक-संविग्न-मानसः | (m. nom. sg. BV) whose heart was overcome by sorrow, with a heart overcome with sorrow |

श्री भगवान् उवाच

क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप ॥२॥३॥

śrībhagavān uvāca
klaibyaṃ mā sma gamaḥ pārtha naitat tvayy upapadyate
kṣudraṃ hṛdayadaurbalyaṃ tyaktvottiṣṭha parantapa

क्लैब्यम् । मा । स्म । गमः । पार्थ । न । एतत् । त्वयि । उपपद्यते
क्षुद्रम् । हृदय-दौर्बल्यम् । त्यक्त्वा । उत्तिष्ठ । परन्तप ॥

*Kṛṣṇa said:*
2.3. Do not give in to cowardice, O son of Pṛthā. It does not become thee. Abandoning this base weakness of heart, stand up, O tormentor of foes.

| | |
|---|---|
| क्लैब्यम् | (n. acc. sg.) cowardice |
| स्म | indeed, in truth |
| गमः | (2nd sg. aorist subjunctive √गम्) you should undergo, partake of, entertain |
| पार्थ | (m. voc. sg.) O son of पृथा (Arjuna) |
| एतत् | (n. nom. sg.) this |
| त्वयि | (loc. sg.) in thee |
| उपपद्यते | (3rd sg. pr. indic. mid. उप + √पद्) it is suitable, possible, according to rule |
| क्षुद्रम् | (n. acc. sg.) base, low, despicable |
| हृदय | (n.) heart |
| दौर्बल्यम् | (n. acc. sg.) lack of strength, weakness, impotence |
| हृदय-दौर्बल्यम् | (n. acc. sg. TP) faintheartedness |
| त्यक्त्वा | (gerund √त्यज्) abandoning, having abandoned |
| उत्तिष्ठ | (2nd sg. imperative act. √स्था) stand up! arise! |
| परन्तप | Scorcher of foes (Arjuna) |

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही॥२॥२२॥

vāsāṃsi jīrṇāni yathā vihāya navāni gṛhṇāti naro’parāṇi
tathā śarīrāṇi vihāya jīrṇāny anyāni saṃyāti navāni dehī

वासांसि । जीर्णानि । यथा । विहाय । नवानि । गृह्णाति । नरः । अपराणि
तथा । शरीराणि । विहाय । जीर्णानि । अन्यानि । संयाति । नवानि । देही

2.22. Just as a man, casting off old clothes puts on other new ones, so the embodied one, abandoning worn-out bodies, takes on others that are new.

| | |
|---|---|
| वासांसि | (n. acc. pl.) garments, clothes |
| जीर्णानि | (n. acc. pl.) worn out, old |
| विहाय | (gerund वि + √हा) abandoning, casting away |
| नवानि | (n. acc. pl.) new |
| गृह्णाति | (3rd sg. pr. indic. act. √ग्रभ्) seizes, grasps, takes |
| अपराणि | (n. acc. pl.) others |
| शरीराणि | (n. acc. pl.) bodies |
| अन्यानि | (n. acc. pl.) others |
| संयाति | (3rd sg. pr. indic. act. सम् + √या) meets with, encounters |
| देही | (n. nom. sg.) the embodied, soul, self, आत्मन् |

Chapter 2 v 48

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥२॥४८॥

yogasthaḥ kuru karmāṇi saṅgaṃ tyaktvā dhanañjaya
siddhyasiddhyoḥ samo bhūtvā samatvaṃ yoga ucyate

योग-स्थः । कुरु । कर्माणि । सङ्गम् । त्यक्त्वा । धनञ्जय ।
सिद्धि-असिद्ध्योः । समः । भूत्वा । समत्वम् । योगः । उच्यते ॥

2.48. Fixed in Yoga, O Dhanañjaya, perform actions, giving up attachment, being unperturbed in success and failure; equanimity is called Yoga.

| | |
|---|---|
| योग | (m.) Yoga, discipline, steadfastness |
| स्थः | (m. nom. sg. suffix) fixed, abiding in |
| योग-स्थः | (m. nom. sg. TP) fixed in Yoga, abiding in Yoga |
| कुरु | (2nd sg. imperative act. √कृ) do! make! perform! |
| कर्माणि | (n. acc. pl.) actions, deeds |
| सङ्गम् | (m. acc. sg.) attachment, adherence, clinging |
| त्यक्त्वा | (gerund √त्यज्) abandoning, having abandoned |
| धनञ्जय | (m. voc. sg.) O conqueror of wealth (Arjuna) |
| सिद्धि | (f.) success, attainment, fulfillment |
| असिद्धि | (f.) non-success, failure |
| सिद्धि-असिद्ध्योः | (f. loc., dual DV) in success and/or failure |
| समः | (m. nom. sg) same, equal, indifferent |
| भूत्वा | (gerund √भू) being, becoming, having become |
| समत्वम् | (m. nom. sg) equanimity, indifference, equableness |
| उच्यते | (3rd sg. pr. indic. passive √वच्) it is said, declared |

## Chapter 2 v 65

# प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
# प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥२॥६५॥

prasāde sarvaduḥkhānāṃ hānir asyopajāyate
prasannacetaso hy āśu buddhiḥ paryavatiṣṭhate

## प्रसादे । सर्व-दुःखानां । हानिः । अस्य । उपजायते ।
## प्रसन्न-चेतसः । हि । आशु । बुद्धिः । पर्यवतिष्ठते ॥

2.65. When serenity of mind is reached, there is a cessation of all sorrows. Indeed, the intelligence of the peaceful-minded soon becomes steady.

| | |
|---|---|
| प्रसादे | (m. loc. sg.)in tranquility, in peace |
| सर्व-दुःखानाम् | (n. gen. pl. TP) of all sorrows, misfortunes |
| हानिः | (f.nom. sg. from √हा leave) cessation, withdrawal |
| अस्य | (m. gen. sg.) of him/ it, his, its |
| उपजायते | (3rd sg. pr. indic. passive उप + √जन्) it is born, produced |
| प्रसन्न | (ppp. प्र + √सद्) clear, bright, tranquil, placid |
| चेतसः | (m. gen. sg.) of mind, thought, minded |
| प्रसन्न-चेतसः | (m. gen. sg. BV ) of him whose mind is clear |
| आशु | (adv.) quickly, at once |
| बुद्धिः | (f.nom. sg.) intelligence, enlightenment, discrimination |
| पर्यवतिष्ठते | (3rd sg. pr. indic. mid. परि + अव + √स्था) becomes steady, stands |

तस्मादसक्तः सततं कार्यं कर्म समाचर ।
असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः ॥३॥१९॥

tasmād asaktaḥ satataṃ kāryaṃ karma samācara
asakto hy ācaran karma param āpnoti pūruṣaḥ

तस्मात् । असक्तः । सततम् । कार्यम् । कर्म । समाचर ।
असक्तः । हि । आचरन् । कर्म । परम् । आप्नोति । पूरुषः ॥

3.19. Therefore, always perform the actions which should be done without attachment; for, performing action without attachment man attains the Supreme.

| | |
|---|---|
| असक्तः | (m. nom. sg. ppp. अ + √सञ्ज्) unattached |
| सततम् | (adv.) constantly, perpetually, always |
| कार्यम् | (n. acc. sg. gerundive √कृ) to be done, accomplished, duty, task |
| समाचर | (2nd sg. imperative act. सम्+ आ + √चर्) perform! act! |
| आचरन् | (m. nom. sg. pr. participle act. आ + √चर्) performing, acting, practicing |
| परम् | (m. acc. sg.) the highest, supreme |
| आप्नोति | (3rd sg. pr. indic. act. √आप्) attains, obtains, reaches |

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥३॥२१॥

yadyad ācarati śreṣṭhas tattad evetaro janaḥ
sa yat pramāṇaṃ kurute lokas tad anuvartate

यत् । यत् । आचरति । श्रेष्ठः । तत् । तत् । एव । इतरः । जनः ।
सः । यत् । प्रमाणम् । कुरुते । लोकः । तत् । अनुवर्तते ॥

3.21. Whatever a great man does, that alone other men do; whatever example he sets, people follow that.

| | |
|---|---|
| आचरति | (3rd sg. pr. indic. act. आ + √चर्) does, behaves, practises |
| श्रेष्ठः | (m. nom. sg.) best, most splendid, most excellent |
| इतरः | (m. nom. sg.) the other, another, the rest |
| प्रमाणम् | (n. acc. sg. प्र + √मा) measure, scale, standard |
| कुरुते | (3rd sg. pr. indic. mid. √कृ) makes, sets |
| अनुवर्तते | (3rd sg. pr. indic. mid. अनु + √वृत्) follows |

मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥३॥३०॥

mayi sarvāṇi karmāṇi saṃnyasyādhyātmacetasā
nirāśīr nirmamo bhūtvā yudhyasva vigatajvaraḥ

मयि । सर्वाणि । कर्माणि । संन्यस्य । अध्यात्म-चेतसा ।
निराशीः । निर्ममः । भूत्वा । युध्यस्व । विगत-ज्वरः ॥

3.30. Surrendering all actions to me, mind at rest in the Self, being free from expectation and selfish desire, freed from mental anguish, engage in battle!

| | |
|---|---|
| संन्यस्य | (gerund सम् + नि + √अस्) relinquishing, entrusting, renouncing |
| अध्यात्म | (n.) Being or Supreme Spirit |
| चेतसा | (n. inst. sg.) by/with mind, thinking, heart |
| अध्यात्म-चेतसा | (n. inst. sg. TP) by meditating on the Supreme Spirit |
| निराशीः | (m. nom. sg.) not wishing for, free from desire |
| निर्ममः | (m. nom. sg.) indifferent to "mine", to desire for possessions |
| भूत्वा | (gerund √भू) being, becoming, having become |
| युध्यस्व | (2nd sg. imperative mid. √युध्) fight! engage in battle |
| विगत | (ppp. वि + √गम्) gone away, departed, disappeared |
| ज्वरः | (m. nom. sg.) fever, grief |
| विगत-ज्वरः | (m. nom. sg. BV) one whose grief/fever has departed |

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥३॥३५॥

śreyān svadharmo viguṇaḥ paradharmāt svanuṣṭhitāt
svadharme nidhanaṃ śreyaḥ paradharmo bhayāvahaḥ

श्रेयान् । स्व-धर्मः । विगुणः । पर-धर्मात् । सु-अनुष्ठितात् ।
स्व-धर्मे । निधनम् । श्रेयः । परधर्मः । भय-आवहः ॥

3.35. One’s own duty, though imperfect, is better than the duty of another successfully performed. Better is death in one’s own duty; the duty of another brings danger.

| | |
|---|---|
| श्रेयान् | (m. nom. compar.) better, superior, preferable |
| स्व-धर्मः | (m. nom. sg.) one’s own duty |
| विगुणः | (m. nom. sg.) deficient, imperfect, ineffective, unsuccessful |
| पर-धर्मात् | (m. abl. sg. TP) from duty of another |
| अनुष्ठितात् | (abl. ppp. अनु + √स्था) than done, practised, performed |
| स्व-धर्मे | (m. loc. sg.) in own duty |
| निधनम् | (m. nom. sg.) settling down, end, death |
| श्रेयः | (n. nom. sg. compar.) better, superior, preferable |
| परधर्मः | (m. nom. sg.) duty of another |
| आवहः | (from आ + √वह्) inviting, bringing |
| भय-आवहः | (m. nom. sg. TP) bringing fear |

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः ।
बहवो ज्ञानतपसा पूता मद्भावमागताः ॥४॥१०॥

vītarāgabhayakrodhā manmayā mām upāśritāḥ
bahavo jñānatapasā pūtā madbhāvam āgatāḥ

वीत-राग-भय-क्रोधाः । मद्-मयाः । माम् । उपाश्रिताः ।
बहवः । ज्ञान-तपसा । पूताः । मद्-भावम् । आगताः ॥

4.10. Freed from passion, fear and anger, at one with Me, relying on Me, purified by the fire of wisdom, many have attained My state of Being.

| | |
|---|---|
| वीत | (ppp. वि + √इ) gone away, departed, disappeared |
| वीत-राग-भय-क्रोधाः | (m. nom. pl. BV) whose greed, fear and anger have disappeared |
| मद्-मयाः | (m. nom. pl.) absorbed in Me, thinking solely of Me |
| उपाश्रिताः | (m. nom. pl. ppp. उप +आ + √श्रि) resorting to, clinging to |
| ज्ञान-तपसा | (n. inst. sg. TP 6th) by the austerity of wisdom |
| पूताः | (m. nom. pl. ppp. √पू) purified, cleansed |
| मद्-भावम् | (m. acc. sg.) my state of being |
| आगताः | (m. nom. pl. ppp. आ + √गम्) come to, attained, reached |

यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः ।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ॥४॥१९॥

yasya sarve samārambhāḥ kāmasaṅkalpavarjitāḥ
jñānāgnidagdhakarmāṇaṃ tam āhuḥ paṇḍitaṃ budhāḥ

यस्य । सर्वे । समारम्भाः । काम-सङ्कल्प-वर्जिताः ।
ज्ञान-अग्नि-दग्ध-कर्माणम् । तम् । आहुः। पण्डितम् । बुधाः ॥

4.19. He whose undertakings are all devoid of desirous intentions, and whose deeds are all consumed in the fire of knowledge, him, the sages call wise.

| | |
|---|---|
| समारम्भाः | (m. nom. pl. ppp. सम्+ आ + √रम्भ्) enterprises, undertakings |
| सङ्कल्प | (m.) purpose, aim |
| वर्जिताः | (m. nom. pl. ppp. √वृज्) twisted off, withheld, excluded |
| काम-सङ्कल्प-वर्जिताः | (m. nom. pl. BV) ones who have excluded desirous intentions |
| दग्ध | (ppp. √दह्) burned, consumed |
| आहुः | (3rd. pl. perfect acc. √अह्) they call, they designate, they say |
| बुधाः | (m. nom. pl.) the intelligent, the wise ones |

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥५॥१०॥

brahmaṇy ādhāya karmāṇi saṅgaṃ tyaktvā karoti yaḥ
lipyate na sa pāpena padmapatram ivāmbhasā

ब्रह्मणि । आधाय । कर्माणि । सङ्गम् । त्यक्त्वा । करोति । यः ।
लिप्यते । न । सः । पापेन । पद्म-पत्रम् । इव । अम्भसा ॥

5.10. Dedicating his deeds to Brahman, abandoning attachment, he who acts is not defiled by sin any more than a lotus leaf by water.

| | |
|---|---|
| आधाय | (gerund आ + √धा) placing, putting, having placed |
| सङ्गम् | (m. acc. sg.) attachment, adherence, clinging |
| त्यक्त्वा | (gerund √त्यज्) abandoning, having abandoned |
| लिप्यते | (3rd. sg. pr. passive √लिप्) is smeared, befouled, defiled |
| पद्म-पत्रम् | (n. nom. sg. KD) lotus leaf |
| अम्भसा | (n. inst. sg.) by water |

मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥९॥४॥

mayā tatam idaṃ sarvaṃ jagad avyaktamūrtinā
matsthāni sarvabhūtāni na cāhaṃ teṣv avasthitaḥ

मया । ततम् । इदम् । सर्वम् । जगत् । अव्यक्त-मूर्तिना ।
मत्-स्थानि । सर्व-भूतानि । न । च । अहम् । तेषु । अवस्थितः ॥

9.4. This entire universe is pervaded by Me in My unmanifested form; all beings rest in Me, but I am not contained in them.

| | |
|---|---|
| ततम् | (n. nom. sg. ppp. √तन्) pervaded, stretched |
| जगत् | (n. nom. sg.) universe, world |
| अव्यक्त | (ppp. अ + वि + √अञ्ज्) unmanifest |
| मूर्तिना | (f. inst. sg. TP) by form, image |
| अव्यक्त-मूर्तिना | (f. inst. sg. BV) by me whose form is unmanifest |
| मत्-स्थानि | (n. nom. pl.) in Me abiding; situated in Me |
| अवस्थितः | (m. nom. sg.) standing; placed in, having its place or abode |

सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् ।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥९॥७॥

sarvabhūtāni kaunteya prakṛtiṃ yānti māmikām
kalpakṣaye punas tāni kalpādau visṛjāmy aham

सर्व-भूतानि । कौन्तेय । प्रकृतिम् । यान्ति । मामिकाम् ।
कल्प-क्षये । पुनर् । तानि । कल्पादौ । विसृजामि । अहम् ॥

9.7. All beings, O Kaunteya, go to My Nature at the end of a Kalpa*. I generate them again at the beginning of the next Kalpa.

| | |
|---|---|
| मामिकाम् | (f. acc. sg.) My, Mine, My own |
| कल्प-क्षये | (m. loc. sg. TP) at the destruction of a Kalpa* |
| कल्प-आदौ | (m. loc. sg. TP) at the beginning of a Kalpa* |
| विसृजामि | (1st sg. pr. indic. act. वि + √सृज्) I send forth, create |

*Kalpa – 1,000 yugas, a day of Brahmā

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥९॥२६॥

patraṃ puṣpaṃ phalaṃ toyaṃ yo me bhaktyā prayacchati
tad ahaṃ bhaktyupahṛtam aśnāmi prayatātmanaḥ

पत्रम् । पुष्पम् । फलम् । तोयम् । याः । मे । भक्त्या । प्रयच्छति ।
तत् । अहम् । भक्ति-उपहृतम् । अश्नामि । प्रयत-आत्मनः ॥

9.26. Whoever offers to Me with love, a leaf, a flower, a fruit or water, I enjoy that offering from the faithful one whose heart is pure.

| | |
|---|---|
| तोयम् | (n. acc. sg.) water |
| भक्त्या | (f. inst. sg) with devotion, with love |
| प्रयच्छति | (3rd sg. pr. indic. act. प्र + √यम्) offers, presents, goes toward |
| उपहृतम् | (n. acc. sg. ppp उप + √हृ) offered, presented |
| भक्ति-उपहृतम् | (n. acc. sg. TP) offering of devotion |
| अश्नामि | (1st sg. pr. indic. act. √अश्) I eat, partake of, accept |
| प्रयत | (m. ppp प्र + √यम्) pure, controlled, beautiful |
| प्रयत-आत्मनः | (m. abl. sg. BV) from him whose self is pure |

योो मामजमनादिं च वेत्ति लोकमहेश्वरम् ।
असम्मूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ॥१०॥३॥

yo mām ajam anādiṃ ca vetti lokamaheśvaram
asaṃmūḍhaḥ sa martyeṣu sarvapāpaiḥ pramucyate

यः । माम् । अजम् । अनादिम् । च । वेत्ति । लोक-महा-ईश्वरम् ।
असम्मूढः । सः । मर्त्येषु । सर्व-पापैः । प्रमुच्यते ॥

10.3. He who knows Me as unborn and beginningless, the Great Lord of the worlds, he among mortals is undeluded and liberated from all evils.

| | |
|---|---|
| अजम् | (m. acc. sg.) unborn, birthless |
| अनादिम् | (m. acc. sg.) beginningless, without beginning |
| वेत्ति | (3rd sg. pr. indic. act. √विद्) he knows |
| लोक-महा-ईश्वरम् | (m. acc. sg. TP) great lord of the world |
| असम्मूढः | (m. nom. sg. ppp. अ +सम् + √मुह्) undeluded, unconfused |
| मर्त्येषु | (m. loc. pl.) among mortals |
| सर्व-पापैः | (m. inst. pl.) by all evils, sins |
| प्रमुच्यते | (3rd sg. pr. indic. passive प्र + √मुच्) he is released, freed |

यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥१५॥१२॥

yad ādityagataṃ tejo jagad bhāsayatekhilam
yac candramasi yac cāgnau tat tejo viddhi māmakam

यत् । आदित्य-गतम् । तेजः । जगत् । भासयते । अखिलम् ।
यत् । चन्द्रमसि । यत् । च । अग्नौ । तद् । तेजः । विद्धि । मामकम्॥

15.12. That brilliance which exists in the sun causes the whole world to shine; that which is in the moon as well as in fire – know that light to be Mine.

| | |
|---|---|
| आदित्य-गतम् | (n. nom. sg. TP) proceeding from the sun |
| जगत् | (n. nom. sg.) universe, world |
| भासयते | (3rd sg. causative mid. √भास्) it illumines, it causes to shine |
| अखिलम् | (adv.) without a gap, completely |
| चन्द्रमसि | (m. loc. sg.) the moon |
| विद्धि | (2nd sg. imperative act. √विद्) know! be aware! |
| मामकम् | (m. acc. sg.) belonging to Me, Mine |

अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम् ।
विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते ॥१८॥५३॥

ahaṃkāraṃ balaṃ darpaṃ kāmaṃ krodhaṃ parigraham
vimucya nirmamaḥ śānto brahmabhūyāya kalpate

अहङ्कारम् । बलम् । दर्पम् । कामम् । क्रोधम् । परिग्रहम् ।
विमुच्य । निर्ममः । शान्तः । ब्रह्म-भूयाय । कल्पते ॥

18.53. Having given up egoism, force, conceit, desire, anger, claim on property, free from selfishness and peaceful, he is fit for becoming Brahman.

| | |
|---|---|
| अहङ्कारम् | (m. acc. sg.) egoism |
| दर्पम् | (m. acc. sg.) arrogance, pride, conceit |
| परिग्रहम् | (m. acc. sg.) grasping, taking hold of, possessing |
| विमुच्य | (gerund वि + √मुच्) relinquishing, abandoning |
| निर्ममः | (m. nom. sg.) indifferent to “mine”, unselfish |
| भूयाय | (n. dat. sg.) to or for oneness with |
| ब्रह्म-भूयाय | (n. dat. sg.) to or for oneness with Brahman, for Brahman’s being |
| कल्पते | (3rd sg. pr. indic. mid. √क्लृप्) he/one is fit (for), adapted |

सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः ।
मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ॥१८॥५६॥

sarvakarmāṇy api sadā kurvāṇo madvyapāśrayaḥ
matprasādād avāpnoti śāśvataṃ padam avyayam

सर्व-कर्माणि । अपि । सदा । कुर्वाणः । मत्-व्यपाश्रयः ।
मत्-प्रसादात् । अवाप्नोति । शाश्वतम् । पदम् । अव्ययम् ॥

18.56. Trusting in Me, even performing all actions, by My grace he reaches the eternal unchanging Abode.

| | |
|---|---|
| कुर्वाणः | (m. nom. sg. pr. participle mid. √कृ) doing, performing |
| मत्-व्यपाश्रयः | (m. nom. sg. मत् + वि +अप + आ + √कृ) trusting in Me, taking refuge in Me |
| मत्-प्रसादात् | (m. abl. sg.) from My grace, kindness, favor |
| अवाप्नोति | (3rd sg. pr. indic. act. अव + √आप्) one attains, obtains |
| शाश्वतम् | (n. acc. sg.) eternal, perpetual |
| पदम् | (n. acc. sg.) home, abode, standpoint, position |